## निनदीभ्यां स्नातेः कौशले। (८९/३०८२)

नि नदी इत्येताभ्यामुत्तरस्य स्नातिसकारस्य मूर्धन्यादेशो भवति कौशले गम्यमाने। निष्णातः कटकरणे[1]। निष्णातो [2]रज्जुवर्तने। नद्यां स्नाति इति नदीष्णः[3]। 'सुपि स्थः' (३.२.४/२९१६) [4]इत्यत्र सुपि इति योगविभागात् कप्रत्ययः। कौशले इति किम्? निस्नातः। नद्यां स्नातः नदीस्नातः इति॥

## सूत्रं प्रतिष्णातम्। (९०/३०८३)

प्रतिष्णातम् इति निपात्यते सूत्रं चेद्[5] भवति। प्रतिष्णातम्[6] सूत्रम्। शुद्धमित्यर्थः। प्रतिस्नातम् इत्येवान्यत्र॥

## कपिष्ठलो गोत्रे। (९१/३०८४)

कपिष्ठलः इति निपात्यते गोत्रविषये। कपिष्ठलः नाम यस्य सः कापिष्ठलिः पुत्रः। गोत्रे इति किम्? [7]कपेः स्थलम् कपिस्थलम्॥

## प्रष्ठोऽग्रगामिनि। (९२/२९१७)

प्रष्ठः इति निपात्यते अग्रगामिनि [8]अभिधेये। [9]प्रतिष्ठते इति प्रष्ठः [10]अश्वः। अग्रतो गच्छति इत्यर्थः। अग्रगामिनि इति किम्? प्रस्थे हिमवतः [11]पुण्ये। प्रस्थो [12]व्रीहीणाम्॥

## वृक्षासनयोर्विष्टरः। (९३/३२३३)

विष्टरः इति निपात्यते वृक्षे [13]आसने च [14]वाच्ये। विपूर्वस्य स्तृणातेः षत्वं निपात्यते। विष्टरो वृक्षः। विष्टरमासनम्[15]। वृक्षासनयोः इति किम्? औलपिवाक्यस्य विस्तरः[16]॥

## छन्दोनाम्नि च। (९४/३२०६)

विष्टारः इति निपात्यते[17]। विपूर्वात् स्तॄ इत्येतस्माद् धातोः 'छन्दोनाम्नि च' (३.३.३४/३२०५) इत्येवं विहितो घञ् इति विष्टरः इत्यपि प्रकृते विष्टारः इति विज्ञायते। विष्टारपङ्क्तिः छन्दः। विष्टारो बृहतीछन्दः। छन्दोनाम्नि इति किम्? पटस्य विस्तारः[18]॥

---

1. कुशलः कटकरणे इत्यर्थः इत्यधिकम् क.ड. 2. रज्जुसर्जने ब.ड. 3. नदीतरणे कुशलः इत्यधिकम् क. 4. इति योगविभागात् ब. 5. तद् इत्यधिकम् ब.क.ह. 6. इदं इत्यधिकम् इ. 7. कपीनां क. ड. इ. ह. 8. अर्थे ब. 9. प्रतिष्ठितः इति इ. 10. प्रष्ठो गौः ब.क.ड.इ. 11. शृङ्गे ड. 12. व्रीहिः ब. 13. च इत्यधिकम् क. 14. गम्यमाने क. ड. 15. वृक्षासनवाची विष्टरशब्दः इत्यधिकम् क.इ.ह. 16. सविस्तरं वा वाक्यमाह इत्यधिकम् ब, सविस्तरं वाक्यमाह इत्यधिकम् क. ड. इ. ह. 17. एकदेशविकृतस्य अनन्यत्वात विष्टारशब्दार्थमेतत् निपातनम् इत्यधिकम् क. 18. कम्बलस्य विस्तारः इत्यधिकम् इ.